# पुरुष सूक्तम् | Purusha Suktam PDF In Hindi

ॐ तच्छं॒-योरावृ॑णीमहे । गा॒तुं-यँ॒ज्ञाय॑ । गा॒तुं-यँ॒ज्ञप॑तये । दैवी᳚ स्व॒स्तिर॑स्तु नः । स्व॒स्तिर्मानु॑षेभ्यः । ऊ॒र्ध्वं जि॑गातु भेष॒जम् । शं नो॑ अस्तु द्वि॒पदे᳚ । शं चतु॑ष्पदे ।

ॐ शांतिः॒ शांतिः॒ शांतिः॑ ॥

स॒हस्र॑शीर्‌षा॒ पुरु॑षः । स॒ह॒स्रा॒क्षः स॒हस्र॑पात् ।
स भूमिं॑-विँ॒श्वतो॑ वृ॒त्वा । अत्य॑तिष्ठद्दशांगु॒लम् ॥

पुरु॑ष ए॒वेदग्ं सर्वम्᳚ । यद्भू॒तं-यँच्च॒ भव्यम्᳚ ।
उ॒तामृ॑त॒त्व स्येशा॑नः । य॒दन्ने॑नाति॒रोह॑ति ॥

ए॒तावा॑नस्य महि॒मा । अतो॒ ज्याया॑ग्श्च॒ पूरु॑षः ।
पादो᳚ऽस्य॒ विश्वा॑ भू॒तानि॑ । त्रि॒पाद॑स्या॒मृत॑ं दि॒वि ॥

त्रि॒पादू॒र्ध्व उदै॒त्पुरु॑षः । पादो᳚ऽस्ये॒हाऽऽभ॑वा॒त्पुनः॑ ।
ततो॒ विष्व॒ङ्व्य॑क्रामत् । सा॒श॒ना॒न॒श॒ने अ॒भि ॥

तस्मा᳚द्वि॒राड॑जायत । वि॒राजो॒ अधि॒ पूरु॑षः ।
स जा॒तो अत्य॑रिच्यत । प॒श्चाद्भू॒मिमथो॑ पु॒रः ॥

Panotbook.com

# पुरुष सूक्तम् | Purusha Suktam PDF In Hindi

यत्पुरु॑षेण ह॒विषा᳚ । दे॒वा य॒ज्ञमत॑न्वत ।
व॒सं॒तो अ॑स्यासी॒दाज्य᳚म् । ग्री॒ष्म इ॒ध्मश्श॒रद्ध॒विः ॥

स॒प्तास्या॑सन्परि॒धय॑ः । त्रिः स॒प्त स॒मिध॑ः कृ॒ताः ।
दे॒वा यद्य॒ज्ञं त॑न्वा॒नाः । अब॑ध्न॒न्-पुरु॑षं प॒शुम् ॥

तं-यँ॒ज्ञं ब॒र्॒हिषि॒ प्रौक्ष॑न् । पुरु॑षं जा॒तम॑ग्र॒तः ।
तेन॑ दे॒वा अय॑जंत । सा॒ध्या ऋष॑यश्च॒ ये ॥

तस्मा᳚द्य॒ज्ञात्स॑र्व॒हुत॑ः । संभृ॑तं पृषदा॒ज्यम् ।
प॒शूग्ग्-स्ताग्ग्-श्च॑क्रे वाय॒व्यान्॑ । आ॒र॒ण्यान्-ग्रा॒म्याश्च॒ ये ॥

तस्मा᳚द्य॒ज्ञात्स॑र्व॒हुत॑ः । ऋच॒ः सामा॑नि जज्ञिरे ।
छंदाग्॑ंसि जज्ञिरे॒ तस्मा᳚त् । यजु॒स्तस्मा॑दजायत ॥

तस्मा॒दश्वा॑ अजायंत । ये के चो॑भ॒याद॑तः ।
गावो॑ ह जज्ञिरे॒ तस्मा᳚त् । तस्मा᳚ज्जा॒ता अ॑जा॒वय॑ः ॥

यत्पुरु॑ष॒-व्यँ॑दधु॒ः । क॒ति॒था व्य॑कल्पयन्न् ।
मुखं॒ किम॑स्य॒ कौ बा॒हू । कावू॒रू पादा॑वुच्येते ॥

ब्रा॒ह्म॒णो᳚ऽस्य मुख॑मासीत् । बा॒हू रा॑ज॒न्य॑ः कृ॒तः ।
ऊ॒रू तद॑स्य॒ यद्वैश्य॑ः । प॒द्भ्याग्ं शू॒द्रो अ॑जायतः ॥

Panotbook.com

# पुरुष सूक्तम् | Purusha Suktam PDF In Hindi

चंद्रमा मनसो जातः । चक्षोः सूर्यो अजायत ।
मुखादिंद्रश्चाग्निश्च । प्राणाद्वायुरंजायत ॥

नाभ्या आसीदंतरिक्षम् । शीर्ष्णो द्यौः समवर्तत ।
पद्भ्यां भूमिर्दिशः श्रोत्रा□त् । तथा लोकागं अकल्पयन्न् ॥

वेदाहमेतं पुरुषं महांतम्□ । आदित्यवर्णं तमसस्तु पारे ।
सर्वाणि रूपाणि विचित्य धीरः । नामानि कृत्वाऽभिवदन्, यदाऽऽस्ते□ ॥

धाता पुरस्तादयमुदाजहार । शक्रः प्रविद्वान्-प्रदिशश्चतस्रः ।
तमेवं-विँद्वानमृत इह भवति । नान्यः पंथा अयनाय विद्यते ॥

यज्ञेन यज्ञमयजंत देवाः । तानि धर्माणि प्रथमान्यासन्न् ।
ते ह नाकं महिमानः सचंते । यत्र पूर्वे साध्यास्संति देवाः ॥

अद्भ्यः संभूतः पृथिव्यै रसा□च्च । विश्वकर्मणः समवर्तताधि ।
तस्य त्वष्टा विदधद्रूपमेति । तत्पुरुषस्य विश्वमाजानमग्रे□ ॥

वेदाहमेतं पुरुषं महांतम्□ । आदित्यवर्णं तमसः परस्तात् ।
तमेवं-विँद्वानमृत इह भवति । नान्यः पंथा विद्यतेऽयनाय ॥

प्रजापतिश्चरति गर्भे अंतः । अजायमानो बहुधा विजायते ।
तस्य धीराः परिजानंति योनिम्□ । मरीचीनां पदमिच्छंति वेधसः ॥

Parrotbook.com

# पुरुष सूक्तम् | Purusha Suktam PDF In Hindi

यो देवेभ्य आतपति । यो देवानां पुरोहितः ।

पूर्वो यो देवेभ्यो जातः । नमो रुचाय ब्राह्मये ॥

रुचं ब्राह्मं जनयंतः । देवा अग्रे तदब्रुवन्न् ।

यस्त्वैवं ब्राह्मणो विद्यात् । तस्य देवा असन् वशे ॥

ह्रीश्च ते लक्ष्मीश्च पत्न्यौ । अहोरात्रे पार्श्वे ।

नक्षत्राणि रूपम् । अश्विनौ व्यात्तम् ।

इष्टं मनिषाण । अमुं मनिषाण । सर्वं मनिषाण ॥

तच्छं-योंरावृंणीमहे । गातुं-यँज्ञाय । गातुं-यँज्ञपतये । दैवी स्वस्तिरस्तु नः । स्वस्तिर्मानुषेभ्यः । ऊर्ध्वं जिगातु भेषजम् । शं नो अस्तु द्विपदे । शं चतुष्पदे ।

ॐ शांतिः शांतिः शांतिः ॥